श्री मातंगिनी कवचं

श्री मातंगिनी कवचं (त्रैलोक्यमंगळ कवचं)

श्रीदेव्युवाच |
साधु साधु महादेव कथयस्व सुरेश्वर |
मातंगीकवचं दिव्यं सर्वसिद्धिकरं नृणां || 1 ||

श्री ईश्वर उवाच |
शृणु देवि प्रवक्ष्यामि मातंगीकवचं शुभं |
गोपनीयं महादेवि मौनी जापं समाचरेत् || 2 ||

अस्य श्रीमातंगीकवचस्य दक्षिणामूर्तिर्ऋषिः विराट् छंदः मातंगी देवता चतुर्वर्गसिद्ध्यर्थे विनियोगः ||

ॐ शिरो मातंगिनी पातु भुवनेशी तु चक्षुषी |
तोडला कर्णयुगळं त्रिपुरा वदनं मम || 3 ||

पातु कंठे महामाया हृदि माहेश्वरी तथा |
त्रिपुष्पा पार्श्वयोः पातु गुदे कामेश्वरी मम || 4 ||

ऊरुद्वये तथा चंडी जंघयोश्च हरप्रिया |
महामाया पादयुग्मे सर्वांगेषु कुलेश्वरी || 5 ||

अंगं प्रत्यंगकं चैव सदा रक्षतु वैष्णवी |
ब्रह्मरंध्रे सदा रक्षेन्मातंगी नाम संस्थिता || 6 ||

रक्षेन्नित्यं ललाटे सा महापिशाचिनीति च |
नेत्रायोः सुमुखी रक्षेद्देवी रक्षतु नासिकां || 7 ||

महापिशाचिनी पायान्मुखे रक्षतु सर्वदा |
लज्जा रक्षतु मां दंतान् चोष्ठौ सम्मार्जनीकरी || 8 ||

चिबुके कंठदेशे तु ठकारत्रितयं पुनः |
सविसर्गं महादेवि हृदयं पातु सर्वदा || 9 ||

नाभिं रक्षतु मां लोला कालिकावतु लोचने |
उदरे पातु चामुंडा लिंगे कात्यायनी तथा || 10 ||

उग्रतारा गुदे पातु पादौ रक्षतु चांबिका |
भुजौ रक्षतु शर्वाणी हृदयं चंडभूषणा || 11 ||

जिह्वायां मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका |
विजया दक्षिणे पातु मेधा रक्षतु वारुणे || 12 ||

नैर्ऋत्यां सुदया रक्षेद्वायव्यां पातु लक्ष्मणा |
ऐशान्यां रक्षेन्मां देवी मातंगी शुभकारिणी || 13 ||

रक्षेत्सुरेशी चाग्नेय्यां बगला पातु चोत्तरे |
ऊर्ध्वं पातु महादेवी देवानां हितकारिणी || 14 ||

पाताले पातु मा नित्यं वशिनी विश्वरूपिणी |
प्रणवं च तमोमाया कामबीजं च कूर्चकं || 15 ||

मातंगिनी ङेयुतास्त्रं वह्निजायावधिर्मनुः |
सार्धैकादशवर्णा सा सर्वत्र पातु मां सदा || 16 ||

इति ते कथितं देवि गुह्याद्गुह्यतरं परं |
त्रैलोक्यमंगळं नाम कवचं देवदुर्लभं || 17 ||

य इदं प्रपठेन्नित्यं जायते संपदालयं |
परमैश्वर्यमतुलं प्राप्नुयान्नात्र संशयः || 18 ||

गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि |
ऐश्वर्यं सुकवित्वं च वाक्सिद्धिं लभते ध्रुवं || 19 ||

नित्यं तस्य तु मातंगी महिला मंगलं चरेत् |
ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः सुरसत्तमाः || 20 ||

ब्रह्मराक्षसवेताला ग्रहाद्या भूतजातयः |
तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवंति ते || 21 ||

कवचं धारयेद्यस्तु सर्वसिद्धिं लभेद्ध्रुवं |
राजानोऽपि च दासाः स्युः षट्कर्माणि च साधयेत् || 22 ||

सिद्धो भवति सर्वत्र किमन्यैर्बहुभाषितैः |
इदं कवचमज्ञात्वा मातंगीं यो भजेन्नरः || 23 ||

अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः |
गुरौ भक्तिः सदा कार्या कवचे च दृढा मतिः || 24 ||

तस्मै मातंगिनी देवी सर्वसिद्धिं प्रयच्छति || 25 ||

इति नंद्यावर्ते उत्तरखंडे मातंगिनी कवचं ||